इण्टर प्रथम वर्षस्य कृते (साहित्यम्)

अभिज्ञानशाकुन्तलम्नाम नाटकस्य श्लोक व्याख्या।

'कुल्याम्भोभिः पवन चपलैः शाखिनो धौतमूलाः
भिन्नो रागः किसलयरुचामाज्य धूमोद्गमेन।
एते चार्वागुपवनभुवि छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दं-मन्दं चरन्ति॥'

महाकवि-कालिदासेन विरचितं अभिज्ञानशाकुन्तलम् नाम नाटकस्य प्रथमाङ्कात् अवतरितः श्लोकोऽयम्। महर्षि कण्वस्याश्रमे प्रवेशं कर्तुकामः तथा च वैखानसेन मृगमारणात् निवारितः नृपः दुष्यन्तः आश्रमस्य सीमां प्रविश्य राजा अवलोकयति यत् एव आश्रम अहो तपोवनस्यैव प्रस्तुतम्

पवनचपलैः कुल्याम्भोभिः शाखिनः धौतमूलाः, आज्य-धूमोद्गमेन किसलयरुचां रागः भिन्नः एते च नष्टाशङ्काः हरिणशिशवः अर्वाक् छिन्नं दर्भाङ्कुरायाम् उपवनभुवि मन्दं मन्दं चरन्ति।

पवनेन = वायुना, चपलैः = तरङ्गितैः, कुल्याः = क्षुद्र सरितः, तासां अम्भोभिः = जलैः, शाखिनः = वृक्षाः, धौतानि = प्रक्षालितानि मूलानि = मूलभागाः येषां ते, आज्यं = घृतं तस्य धूमः = हवनप्रयुक्तघृतधूमस्तस्य उद्गमेन = निःसरणेन, किसलयानां = नवपल्लवानां रुचां = कान्तिः तेषां रागः = रक्तिमा, भिन्नः = परिवर्तितः, एते = दृश्यमानाः नष्टाः = पलायिताः दूरीभूताः आशङ्काः = ताडनभयानि येषां ते हरिणानां = मृगाणां, शिशवः = पोताः, अर्वाक् = समीपे एव छिन्नाः = लूनाः कर्तिताः दर्भाणां = कुशानां, अङ्कुराः = अग्रभागाः, यस्यां उपवनस्य = उद्यानस्य, भुवि = भूमौ, मन्दमन्दं = स्वेच्छया शनैः शनैः, चरन्ति = संचरन्ति। कुत्रापि नैव पलायन्ते हरिणाः।

अत्र कुल्याम्भोभिः शाखिनां धौतमूलादीनां हेतुत्वेन कारणलिङ्गम्। अत्र कुल्याम्भोज्ञानानुमाने हेतुत्वात् अनुमानालङ्कारः — 'अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्' इति लक्षणात्। अत्र स्वभाव वर्णनाच्च स्वभावोक्तिः तेन संकरालङ्कारः। मन्दाक्रान्ता वृत्तम् — मन्दाक्रान्ताम्बुधिरसनगैः मोभनौ तौ गयुग्मम् इति लक्षणात्॥

उपेन्द्र झा

8/8/20

प्रा० प्रेम संस्कृत

रा० उ० मा० महाविद्यालय

कुरसेला, कटिहार

शास्त्रि तृतीय खण्डस्य कृते (साहित्यम्)
पूर्वमेघदूतस्य श्लोक व्याख्या

१ "कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्त:
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥"

श्लोकोऽयं महाकवि कालिदासप्रणीत मेघदूतस्य खण्डकाव्यस्य पूर्वमेघभागात् उद्धृतमस्ति। अस्मिन् श्लोके कवि: प्रियाविरहाकुलस्य यक्षाधिप: कुबेरानुचरस्य यक्षस्य 'रामगिरि' इत्याख्ये पर्वते वासक्रमं वर्णयति।

स्वाधिकारात्, प्रमत्त:, कान्ताविरहगुरुणा, वर्षभोग्येण, भर्तु:, शापेन, अस्तङ्गमितमहिमा, कश्चित्, यक्ष:, जनकतनयास्नानपुण्योदकेषु, स्निग्धच्छायातरुषु, रामगिर्याश्रमेषु, वसतिं, चक्रे।

अधिक्रियते अस्मिन्नित्यधिकार:, स्वस्य = आत्मन: अधिकार: = कर्तव्यम्, स्वाधिकारस्तस्मात् स्वाधिकारात् = आत्मकर्तव्यात्, प्रमत्त: = असावधान:, कान्ताया: = स्वप्रियतमाया:, विरह: = वियोग:, कान्ताविरह: तेन गुरुत्वेन कान्ताविरहगुरुणा = प्रियतमाविरहदु:खेन, भोक्तुमर्हं भोग्यम्, वर्षभोग्य: वर्षभोग्य = संवत्सरप्राप्यस्तेन वर्षभोग्येन = संवत्सरभोगयोग्येन, भर्तु: = यक्षाधिपस्य कुबेरस्य, शापेन = निग्रहवचनेन, अस्तं गमित: अस्तंगमित: = प्रतिकूल:, महिमा = प्रभाव: यस्य स: अस्तंगमितमहिमा, कश्चित् = कोऽपि, यक्ष: = देवयोनिविशेष:, जनकस्य तनया जनकतनया = सीता, तस्या: स्नानै: = अवगाहनै: पुण्यानि = पुण्यानि, उदकानि = सलिलानि येषु तानि तेषु जनकतनयास्नानपुण्योदकेषु = सीतावगाहनपूतसलिलेषु, स्निग्धा = निबिडा सघनेत्यर्थ:, या छाया स्निग्धच्छाया, स्निग्धच्छायाप्रधाना-स्तरव: = वृक्षा:, येषु तानि स्निग्धच्छायातरवस्तेषु स्निग्धच्छायातरुषु = सघनच्छाया वृक्षेषु, रामगिर्याश्रमेषु = रामगिरि इत्याख्ये पर्वताश्रमेषु वसतिं = निवासं, चक्रे = चकार।

श्लोकेऽस्मिन् अनुप्रासालङ्कार: मन्दाक्रान्ता वृत्तमस्त्येति।

उपेन्द्र झा
9/8/20
प्रो० प्रा० साहित्य
रा०उ० सं० महाविद्यालय
पुनौरा, मधुबनी

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

वेणीसंहार नाम नाटकस्य श्लोक व्याख्या

"मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन॥"

प्रस्तुतोऽयं श्लोकः वीर रस प्रधानः वेणीसंहार नामकस्य नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् महाकविना भट्टनारायणेन निगदितं यत् - क्रुद्धो भीमसेनः सहदेवेन सह भ्रातरं युधिष्ठिरं प्रति सन्धि विरोधं प्रकटयति।

समरे कोपात् कौरवशतं न मथ्नामि, दुःशासनस्य उरस्तः रुधिरं न पिबामि, गदया सुयोधनोरू न संचूर्णयामि? भवतां नृपतिः पणेन सन्धिं करोतु।

मथ्नामीति —

समरे = रणे, कोपात् = रोषात्, कौरवशतं = कौरवाणां शतं (दुर्योधनादीनां शतम्) न = नहि मथ्नामि = मर्दयिष्यामि किम्? दुःशासनस्य = दुर्योधनस्यानुजस्य, उरस्तः = वक्षःस्थलात्, रुधिरम् = रक्तम्, न = नहि, पिबामि = पास्यामि किम्? गदया = गदाप्रहारेण, सुयोधनस्य ऊरू इति सुयोधनोरू = दुर्योधनस्य जङ्घाद्वयं न = नहि संचूर्णयामि = प्रोत्पिष्टयामि किम्? भवतां = युष्माकम्, नृपतिः = नृपो (युधिष्ठिरः) पणेन = पञ्चग्राम मूल्येन सन्धिम् = मैत्रीम्, करोतु = विदधातु।

श्लोकेऽस्मिन् अयं भावः निस्सरति यत् भीमसेनः उपर्युक्तानां कार्याणां सम्पादने निश्चितमेव कर्तुं क्षमः। अत्र वसन्ततिलका वृत्तम्। तल्लक्षणं यथा - उक्ता वसन्ततिलका तभजा जगौ गः इति

उपेन्द्र झा
8/8/20
व्या०प्रा० साहित्य
[illegible]
[illegible]

Aug 8, 202